श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पाटलाद्रिनरसिंहस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

Our sincere thanks to Dr. Dayanath, Asst. Professor, Department of Veda, Rashtriya Sanskrit Sansthan, who provided us the Devanaagarii script of this stotra, the original of which appears in Tamil on a wall of Singaperumal Kovil near Chengalpet.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पाटलाद्रिनरसिंहस्तुतिः ॥

जितन्ते महास्तम्भसम्भूतविष्णो
    जितन्ते जगद्रक्षणार्थावतार।
जितन्ते हरे पाटलाद्रौ निवासिन्
    जितन्ते नृसिंह प्रसीद प्रसीद ॥ **1** ॥

नमस्ते जगन्नाथ विष्णो मुरारे
    नमस्ते नृसिंहाच्युतानन्त देव।
नमस्ते कृपालो हरे चक्रपाणे
    नमस्स्तम्भसम्भूत दिव्यावतार ॥ **2** ॥

परब्रह्मरूपं प्रबुद्धाट्टहासं
    करे प्रौढचक्रं हरब्रह्मसेव्यम्।
प्रसन्नं त्रिनेत्रं हरिं पाटलाद्रौ
    शुभं मेघगात्रं नृसिंहं भजामः ॥ **3** ॥

गिरिजनृहरिमीशं गर्वितारातिवज्रं
    परमपुरुषमाद्यं पाटलाद्रौ प्रसन्नम्।
अभयवरदहस्तं शङ्खचक्रे दधानं
    शरणमिह भजामः शाश्वतं नारसिंहम् ॥ **4** ॥

श्रीनृसिंह महासिंह दिव्यसिंह प्रभो हरे।
गिरिसम्भव देवेश रक्ष मां शरणागतम् ॥ **5** ॥

॥ श्री पाटलाद्रिनरसिंहस्तुतिः समाप्ता ॥